लोहितकं, क्ली, ( लोहितमिव। इवार्थे कन्। ) रीतिः। इति राजनिर्घण्टः॥

लोहितकः, पुं, ( लोहित एव। स्वार्थे कन्। ) मङ्गलग्रहः। इति शब्दमाला॥ पद्मरागमणिः। इति हेमचन्द्रः॥ ( यथा, माघे। १३। ५२।

"लयनेषु लोहितकनिर्म्मिता भुवः
शितिरत्नरश्मिहरितीकृतान्तराः॥"

रक्तवर्णयुक्ते, त्रि। यथा, महाभारते। २।६।३।

"नीलपीतासितश्यामैः सितैर्लोहितकैरपि।
अवतानैस्तथा गुल्मैर्म्मञ्जरीजालधारिभिः॥")

लोहितचन्दनं, क्ली, ( लोहितं चन्दनमिव। ) कुङ्कुमम्। इत्यमरः॥ रक्तचन्दनम्॥ ( यथा, किरातार्ज्जुनीये। १। ३४।

"परिभ्रमन् लोहितचन्दनोचितः
पदातिरन्तर्गिरिरेणुरूषितः॥")

लोहितपुष्पकः, पुं, ( लोहितं पुष्पमस्य। कप्। ) दाड़िमवृक्षः। इति भावप्रकाशः॥

लोहितमृत्तिका, स्त्री, (लोहिता मृत्तिका।) गैरिकम्। इति रत्नमाला॥ रक्तवर्णमृत्तिका च॥

लोहिता, स्त्री, (लोहित+स्त्रियां टाप्।) रागादिना रक्तवर्णा। इति जटाधरः॥ वराहक्रान्ता। इति शब्दचन्द्रिका॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥

लोहिताक्षः, पुं, ( लोहिते अक्षिणी यस्य। सक्थ्यक्ष्णोः स्वाङ्गात् षच्। ) विष्णुः। इति शब्दमाला॥ कोकिलः। इति शब्दचन्द्रिका॥ रक्तवर्णचक्षुर्युक्ते, त्रि। ( यथा, महाभारते। १। ५६। ६।

"यथा सूतो लोहिताक्षो महात्मा
पौराणिको वेदितवान् पुरस्तात्॥")

लोहिताङ्गः, पुं, ( लोहितमङ्गं यस्य। ) मङ्गलग्रहः। इत्यमरः॥ (यथा, हरिवंशे। २२८। १२।

"वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती।
शनैश्चरो लोहिताङ्गो लोहितार्कसमद्युतिः॥")

कम्पिल्लकः। इति राजनिर्घण्टः॥

लोहिताननः, पुं, ( लोहितमाननं मुखं यस्य। ) नकुलः। इति राजनिर्घण्टः॥ रक्तवर्णमुखे, त्रि॥

लोहितायः, [स्] क्ली, ( लोहितमयः। ) ताम्रम्। इति त्रिकाण्डशेषः॥ ( विशेषोऽस्य ताम्रशब्दे विज्ञेयः॥ )

लोहितायसं, क्ली, ( लोहितमायसम्। ) रक्तवर्णलोहजातिः। इति मुग्धबोधव्याकरणम्॥

लोहिनी, स्त्री, ( लोहिता+"वर्णादनुदात्तादिति।" ४। १। ३९। इति ङीप्। तकारस्य नकारादेशश्च। ) रक्तवर्णा स्त्री। यथा,—

"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा॥"

इति जटाधरः॥

लोहोत्तमं, क्ली, (लोहेषु सर्व्वतैजसेषु उत्तमम्।) स्वर्णम्। इति हेमचन्द्रः॥

लौकायतिकः, पुं, ( लोकायतमधीते वेद वा। लोकायत+"क्रतूक्थादि सूत्रान्तात् ठक्।" ४। २। ६०। इति ठक्।) तार्किकभेदः। (यथा, गौ० रामायणे। २। १०९। २९।

"कच्चिन्न लौकायतिकान् ब्राह्मणानुपसेवसे।
अनर्थकुशला ह्येते मूढ़ाः पण्डितमानिनः॥")

चार्व्वाकशास्त्रवेत्ता। लोकायतं वेत्ति इत्यर्थे णिकप्रत्ययेन निष्पन्नोऽयम्॥

लौकिकः, त्रि, (लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा। लोक+ठञ्।) लोकव्यवहारसिद्धः। यथा,—

"वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते।
निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसंग्रहः॥"

इति कलापव्याकरणे सन्धिवृत्तौ प्रथमप्रकरणम्॥ लोकाय हित इत्यर्थे च णिकप्रत्ययनिष्पन्नः। इति मुग्धबोधव्याकरणम्॥

लौकिकता, स्त्री, (लौकिकस्य भावः। लौकिक+तल्।) लोकव्यवहारसिद्धत्वम्। शिष्टाचारेऽस्य भूरिप्रयोगः॥

लौकिकाग्निः, पुं, ( लौकिकोऽग्निः। ) असंस्कृताग्निः। यथा, आह्निकतत्त्वे।

"न पैत्रयज्ञियो होमो लौकिकाग्नौ विधीयते॥"

लौड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ ( भ्वा०-पर०-अक०-सेट्। ) चतुर्द्दशस्वरी। ऋ, अलुलौड़त्। इति दुर्गादासः॥

लौहः, पुं, ( लोह एव। प्रज्ञाद्यण्। ) लोहः। इत्यमरटीकायां भरतः॥ स च पञ्चविधः। यथा। काष्णिः १ पाण्डिः २ कान्तः ३ कालिङ्गः ४ वज्रकः ५। अस्य त्रयोदशविधसंस्काराः। यथा। शालिघर्षणम् १ उद्वर्त्तनम् २ अम्लभावनम् ३ आतपशोषः ४ निषेकः ५ मारणम् ६ दलनम् ७ चालनम् ८ सूर्य्यपाकः ९ स्थालीपाकः १० चूर्णनम् ११ पुटपाकः १२ पाकनिष्पन्नः १३। अस्य गुणाः। आयुर्ब्बलवीर्य्यकामदाढ्यत्वम्। रोगनाशित्वम्। श्रेष्ठतमरसायनत्वञ्च। कृष्णवर्णस्य तस्य गुणाः। शोथशूलार्शःकुष्ठपाण्डुप्रमेहमेदवायु-नाशित्वम्। वयःस्थैर्य्यचक्षुस्तेजःकारित्वम्। सारकत्वम्। गुरुत्वञ्च। शोधितस्यास्य गुणौ। सर्व्वरोगनाशित्वम्। मरणनाशित्वञ्च। अशुद्धस्य तस्य गुणाः। जारणायोग्यत्वम्। आयुर्नाशकत्वञ्च। इति रत्नावल्यादयः॥*॥ ( अथास्य शोधनादिनियमः।

"त्रिफलाष्टगुणे तोये त्रिफलाषोड़शं पलम्।
ततः क्वाथे पादशेषे लौहस्य पलपञ्चकम्॥
कृत्वा तप्तानि पत्राणि सप्तवारं निषेचयेत्।
ध्रुवं प्रलीयते दोषो गिरिजे लोहसम्भवः॥"

इति लोहशोधनम्॥ * ॥

"भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः।
निरुत्थो जायते लौहो यथोक्तफलदो भवेत्॥"

इति संक्षिप्तलौहमारणम्॥ * ॥

"द्वादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत्।
कन्यानीरेण संमर्द्द्य यामयुग्मञ्च संपुटे।
पुटेदेवं लौहचूर्णं सप्तधा मारणं व्रजेत्॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥") अन्यत् लोहशब्दे द्रष्टव्यम्॥ ( छागविशेषः। यथा, महाभारते। १३। ८८। १३।

"अजेन वापि लौहेन मघास्वेव यतव्रतः।
हस्तिच्छायासु विधिवत् कर्म्म व्यजनवीजितम्॥"

लोहशब्दार्थोऽप्यत्र॥ )

लौहचारकः, पुं, ( लौहेन लौहनिगड़ेन चारः प्रचारो यत्र।) नरकभेदः॥ यत्र निगड़ैर्वध्यन्ते। इति पुराणम्॥

लौहजं, क्ली, (लौहात् जायते इति। जन्+डः।) मण्डूरम्। इति रत्नमाला॥

लौहभाण्डः, पुं, ( लौहस्य भाण्डमिवाकृतिर्यत्र। ) अश्मभालम्। इति शब्दचन्द्रिका॥ हामन्दिस्ता इति भाषा। लौहनिर्म्मितभाण्डे, क्ली॥

लौहभूः, स्त्री, ( लौहस्य भूरिव। ) कठिनी। सा तु लौहपात्रविशेषः। यथा,—

"लौहात्मा चायुगा लौहा लौहभूः कठिन्यपि॥"

इति शब्दचन्द्रिका॥

लौहमलं, क्ली, ( लौहस्य मलम्। ) लोहमलम्। इति राजनिर्घण्टः॥ ( तथास्य विषयः।

"सद्यो लौहमलाज्यमाक्षिकसिताभागाः समा मानतः
पात्रे ताम्रमये दिनान्तमथितं संस्थापयेदातपे
पश्चात्तद्घनतां प्रणीय रजनीमेकां बहिः स्थापयेत्।
पात्रे ताम्रमये विधेयमथवा पात्रे रविर्भाविते॥
पश्चान्माषचतुष्टयं प्रतिदिनं जग्ध्वा जलं शीतलम्।
पेयं भोजनपूर्व्वमध्यविरतोऽस्वच्छन्दभोक्तैर्नरैः॥
जेतुं शूलहुताशमान्द्यकसनश्वासाम्लपित्तज्वरोन्मादापक्तिमेहसर्व्वजठराजीर्णादि सर्व्वा रुजः॥"

इति भैषज्यधन्वन्तरौ शूले चतुःसममण्डूरम्॥ )

लौहशङ्कुः, पुं, (लौहस्य शङ्कुर्यत्र।) नरकविशेषः। यत्र सूचीभिर्भिद्यते। इति पुराणम्॥ लौहनिर्म्मितकीलकञ्च॥

लौहा, स्त्री, लौहभूः। इति शब्दचन्द्रिका॥

लौहात्मा, स्त्री, (लौह आत्मा यस्याः।) लौहभूः। इति शब्दचन्द्रिका॥

लौहितः, पुं, लोहितः। इति लोहितशब्दात् स्वार्थे ष्णा-( अण् ) प्रत्ययेन निष्पन्नः॥ लोहितसम्बन्धिनि, त्रि॥

लौहितीकः, त्रि, (लोहित इव। लोहित+"कर्कलोहितादीकक्।" ५। ३। ११०। इति ईकक्।) लोहितवर्णतुल्यः। इति सिद्धान्तकौमुदी॥

लौहित्यं, क्ली, ( लोहितस्य भावः। लोहित+ष्यञ्। ) लोहितत्वम्। इति मेदिनी। ये, १०२॥